𑆑𑇀𑆫𑆩𑆥𑆢𑇀𑆣𑆠𑆴𑆂

𑇕𑇕𑇐𑇓

5503
E. 18

वाजपेय [illegible] ८५०

नकल० १

[illegible] देव
[illegible]
[illegible] पोथा

[illegible]

६०४

०॥ॐश्रीगणेशायनमः॥ बहुभिश्चकांचनमयैर्मरकतमयैर्विराजितैः। चैत्रनकालिवसुंरनवस्परसी कहबहुकेलिं
गणेशं॥१॥ विद्याकरान्गुरून्नत्वा सर्वविद्याकराग्रिणः। केशवदीक्षितशर्मा तनुते क्रतुपद्धतिं॥२॥ गवामयनकु
क्लृप्तानी श्रुतिमंत्रपाठानुसारेण प्राप्तस्य वाजपेयस्य ब्राह्मणकर्तृकस्य प्रयोगो विलिख्यते॥ स च शारदत्वो ब्राह्म
ण क्षत्रिययोरेव न वैश्यस्य· अथ यदि ब्राह्मणो यजते अथ यदि राजन्यो यजत इति श्रुतेस्तयोरेव भवति॥
तत्र वाजपेये त्रिधा सामगाः पद्धतिकारा आमनंति। ते च संस्थावाजपेयक्रतुवाजपेयशारदवाजपेयाः। प्रकाः
तत्र प्रथमं संस्थावाजपेयस्तस्य सर्वोपि विधिर्वक्ष्यमाणशारदवाजपेयवत्॥ दक्षिणासु विशेषः गवांशतं द्वादशो
त्तरं वा। सुब्रह्मण्याह्वाने इन्द्र आगच्छेति विश्वे ब्रह्मण आगच्छतेति च विशेषो न भवति। संस्थापत्नीवत एव भवंति।
न प्राजापत्याः। वसंत एव कालः। न पदियज्ञो। मरुत्वतीयांते रथावहरणादि यद्वक्ष्यते आध्वर्यवं तन्न भवति इति
द्वितीयस्तु सामगाचार्यैरेवोच्यते। तस्य सर्वोपि विधिः प्रोक्तो मुख्यवक्ष्यमाणक्रतुवाजपेयवत्। दक्षिणासु सप्तदशो
व गावः इति· सहस्रदक्षिणविषयिकोऽप्यदाभ्यग्रहधातत्वादि न भवति। तेषु शारदवैश्यस्येति कात्यायनेन दर्शितोमु

स्यः क्रतुविशेषरूपः। तस्येदानीं प्रयोगउच्यते यथा॥ तस्य शारदिपूर्णिमायां सुत्या। ब्राह्मणक्षत्रियावधिकारि
णौ। न वैश्यः। संस्था वाजपेये तु वैश्योप्यधिकारी संस्थात्वात्। संस्थास्तु देहसंस्काररूपाः नित्याः सप्त तेषां माचरणं तु
नित्यं अकरणे देहसंस्कारन्यूनतापत्तेः शारदि वाजपेयस्य निषेधादेव। तस्माद्वैश्योप्यत्राधिकारी॥ अथ वाजपे
यस्य षोडशिविकारत्वं॥ षोडशि नित्यं मैत्रायणीयकृश्रुतौ चयननिषेधः। शाबरभाष्यात् तद्ग्रहश्रुतौ तु अथातोग्नि
ष्टोमेनानुयजति तमुक्थेन तमतिरात्रेणोत्यादि आ द्वादशरात्रादनुक्रांतं तत्र षोडशी वाजपेययोश्च चितयः चयने
सिद्धांतितं। तच्छाखांतरपरं। अत्र शाखायां तूत्तरवेदिमपरेणेति कात्यायनेनाभिषेकावसरे सूत्रणादुत्तरवेदिरेव भ
वति न चयने वाजपेये इति कात्यायनमतमाभाति। धानंजय्यः षट्पसमध्यसाग्निचित्यः स्यादिति लाघायनसू
त्रे वाजपेये तु चयनमुक्तं। तत्र साग्निचित्ये इष्टकापशुप्रयोगात्पूर्वं मातृपूजाभ्युदयिके कार्ये। चयनाकरणे तु प्रथम
परियज्ञात्पूर्वं॥ श्रीकर्काचार्यवासुदेवविरचितधन्विहरिहरविद्याकराचार्यप्रमुखैर्महत्प्रबंधेन निरूपणान्न भवति
तेषां मते अग्निः। हरिस्वामि अनंतयाज्ञिकदेवजानीप्रभृतिनां मते भवतीति लिखितं न भवतीति पुनः शौके तो। संस्था

वाजपेयक्रतुरूवाजपेययोस्तु भवति संस्थात्वात्॥ षोडशि विकारान्न भवतीति रत्नेश्वरमिश्राः॥ संस्था वाजपेये संस्थासो
मत्वाद्भवतु क्रतुरूवाजपेये वाजपेयत्वात् षोडशिविकारत्वाच्च नैव भवतीति मधुकरमिश्राणां सिद्धांतः॥ अथ परियज्ञ विल्प
पश्चाउच्यंते। तत्र वाजपेयावसरः शरद आश्विनामावास्या कार्त्तिकामावास्या कार्त्तिक्यां पौर्णमास्यां वा वाजपेयस्तु
त्र्यहः भवति तस्य उभयतः अनंतरहितं पूर्वस्यां उत्तरस्यां च पौर्णमास्यां बृहस्पतिसवाभ्यां यजेत। तयोर्वि[illegible]॥
ज्योतिष्टोमाभ्यां वा तौ चाग्निष्टोमौ अथ यज्ञेऽग्निष्टोम इति वचनात्। तद्विधिरग्निष्टोमपद्धतावु[illegible]। वाजपेय पूर्णि
मायाः पूर्वास्तु द्वादश्यां पूर्णिमास्तु उत्तरास्तु च सोमैर्यजेत। तत्र पूर्वास्त्वयुग्मास्त्वग्निष्टोमाः। युग्मास्तु पृष्ठ्याः षडहः उत्त
रास्तु त्वयुग्मास्तु पृष्ठ्याः षडहः। युग्मास्त्वग्निष्टोमा [illegible]र्वैरग्निष्टोमसंस्थैर्वा पवित्राद्यैः क्रमसंस्थैः राजसूयसोमैः। उभ
यतोऽष्टास्त्वष्टास्तु पूर्णिमाः सु उत्तरास्तु व्युत्क्रमसंस्थैः। तत्र पृष्ठ्ये षडहे प्रथममग्निष्टोमसंस्थं रथंतरपृष्ठमहः॥ द्वितीयं २
पंचदशस्तोमं बृहत्पृष्ठमुक्थ्यसंस्थं। तृतीयं सप्तदशस्तोमं वैरूपपृष्ठमुक्थसंस्थं। पंचमं त्रिणवस्तोमं शाक्वरपृष्ठमुक्थ्य
संस्थं। षष्ठं त्रयस्त्रिंशस्तोमं रैवतपृष्ठमुक्थ्यसंस्थं। चतुर्थमहस्तु एकविंशस्तोमं वैराजपृष्ठं षोडशिसंस्थं। एषां विधि

रुक्तः॥ राजसूयसोमास्तु। पवित्रः १ अभिषेचनीयः। २ दशपेयः। ३॥ केशवपनीयः॥ ४॥ व्युष्टिद्विरात्रोऽहीनधर्मा मासा
पवर्गाः। ५ अत्र क्षत्रधृतिः ६ दीक्षादक्षिणादि उक्तौ राजसूये॥ ७॥ बृहस्पतिसवविधिरुच्यते॥ अयं स्वतन्त्रोऽपि एकाहयागस्तेनो
ब्रह्मवर्चसपुरोधाकामस्य भवति। यश्चैतेन यजेत सोऽन्यैरेवाभिवाद्यते न कंचनाभिवादयति। अभ्युत्क्षे यस्याप्यनभ्युत्थायी
स्यात्। स्थपतिरिति एजित नाम्नोवाच्यः स राजा नो ब्रह्मणाये पुरस्कुर्वीरन् स च। अत्राधिकारी॥ तस्य अश्वत्थेत्वरणादीपवा
ते विशेषः। गणेशपूजनादिविधाय अद्येत्यादि करिष्यमाणवाजपेयनिमित्तं साश्वत्रयस्त्रिंशद्गवीदक्षिणेन साश्वत्रय
स्त्रिंशद्बृतगवीदक्षिणेन वा साश्वत्रयस्त्रिंशत्सहस्रगवीदक्षिणेन वा त्रिवृता ग्निष्टोमसंस्थेन रथन्तरपृष्ठेन बृहस्पतिसवे
नाहं यक्ष्ये। इति संकल्प्यः। ततः संकल्पवाक्यानंतरं त्वमेतेनामुकगोत्रामुकप्रवरः वस्त्रादिभिरर्चितो ब्रह्मा भवेत्या
दि पूर्ववत्। एकादीक्षा द्वादशापरिमिता वा दीक्षाः। तिस्र उपसदः सप्तयव्याः॥ अग्नीषोमीयस्य पशुपुरोडाशमनु
देवसू हविषो निर्वापः। यथा। वाचस्पति प्रैषः प्रणीताप्रणयनं। स्थितस्य चोपयुहस्य। पात्रासादने शूर्पं प्रोक्ष
णीनिः कृ प्रणादग्निहोत्रहवणीं च। एकत्रिंशत्कपालानि। कृष्णाजिनं उलूखलमुसले। पत्नेऽनं। पात्रीं च दक्षे पवाउ

पसर्जनी पात्रे क्रवा। त्रिस्व: पुरोडाशपात्र:। श्रुतावदाने। औषधर्थेऽग्नीषोमीयार्थव्रीहयो यथावा। देवस्यार्थे तु पुन:
प्रकृ दाव्रीहय आश्राव:। पत्नचय पाचि नोव्रीहय आश्राव:। २। नयामाको: ३ नीवारास्तृण धान्यानि। रक्तशाल
शायना:। ४ गवेधुका:। ५ अन्तु मा एव स्वय जाता व्रीहयो नावा:। ६ यवा: ७। इत्यष्टौ पृथक्। पूर्णपात्रे कर्मापवर्गा
3 वेति। उपकल्पनीयेषु षड्कृष्णाल्यो मसलोनि र। शूर्पाग्निहोत्रहवण्यादानादि साधनोते विशेष:। व्रीह्यादि
~~4~~ नो पृथगवेक्षणं। युगपत्प्रक्षपनिरास:। अभावे पृथगभिमर्शनमेव। पृथगालेप:। यहणे व्रीहियवान्यतरस्मा
त। अग्नीषोमाभ्यां जुष्टं गृह्णामि इति। प्रकृतेभ्य: सवित्रे सत्यप्रसवाय जुष्टं। आशुभ्योऽग्नये गृहपतये जुष्टं
श्यामाकेभ्य: सोमाय वनस्पतये जुष्टं। ४। निवारेभ्यो बृहस्पतये वाचे जुष्टं। णेभ्य: इन्द्राय ज्येष्ठाय जुष्टं। ४
गवेधुकाभ्यो ~~सोमाय वनस्पतये जुष्टं~~ रुद्राय पशुपतये जुष्टं। ७। जलस्पर्श:। नांबेभ्यो मित्राय सत्याय जु
ष्टं। यवेभ्यो वरुणाय धर्मपतये जुष्टं गृह्णामि इति। पृथक् तेषामभिमर्शनं। स्थापित पवित्राणां प्रोक्ष २
णी: संस्कृत्य के मा कृ ह तो क मंत्रैस्त्वा जुष्टं प्रोक्षामीति विशेषिते: प्रोक्षणे। कृष्णाजिनोलूखलमुसलशूर्पादि

वेषकपालानि प्रोक्ष्योपसर्जन्यादिप्रोक्षणं। प्रोक्षणीनिःशेषकरणं। कृष्णाजिनादानादितुषविमोकांतोग्नीया
र्थद्रव्यावघातः॰ यदितुषविमोकांतः प्रकृतादीनां पृथगवघातः। अग्नीषोमीयार्थस्य यावत्ये तैः सहवाकृतावध
र्मपत्यर्था अवहताश्चेदवहताः॰ अग्नीषोमीयार्थस्य व्रीहिश्चेयवानां सर्वांतेऽवघातः। अंतेवाग्विसर्गः। पा
त्र्यामोप्यसर्वेषां तंत्रेणाभिमर्शनं। अवघातवत्पृथक् फलीकरणं। कणांतेनिर्देशः। आदिमांतिमयोर्यविचेपी
दानीमेव निर्देशः। अंत्यस्यापेषणात्। सर्वकणानामेकत्ररक्षणं। अग्नीषोमीयार्थैकादशकपालोपधानं। तदुत्
रतः सवितृसत्यप्रसवार्थे द्वादशकपालोपधानं॥२॥ तदुत्तरतोग्नेर्गृहपतेरथैष्टाकपालोपधानं। षड्कृष्णास्था
नकल्पनं। अंगारैः कपालाभ्यूहनं। उपसर्जन्यधिश्रयणं। उपधानोपसर्जन्यधिश्रयणानां योगपद्यास्य यंवि
नष्टि। अन्येद्वये कुर्युः। आद्यद्रव्यद्वयपेषणार्थं कृष्णाजिनादानादि प्रोक्षणांतं॰ प्रथमस्य कृत्वा द्वितीयस्य
॰ हविरावापादि प्रोक्षणांतेश्छिलांतरे। तृतीयस्य यच्छिलांतरे। ततइक्षणं चर्वर्थतण्डुलानामपि। पात्र्यामावा
पः कौ पृथक्। उपसर्जग्रहणसेयवने पृथक्। चकृषु चोपसर्जन्यानयने। अधिश्रयणं विरोधादुक्तिः

प्रथनश्चाग्नेनपुरोडाशो षेव। एकत्रपिष्टलेपापनथनं पात्रं गुल्लि प्रक्षाल्वनस्थापनैश्च। सर्वेषां पर्यग्निकरणं। मंत्रे
णपुरोडाशावरुध्यपणं। आलंभनेन। आप्योदकदानं ततः। नात्र व्रतोपायनौ स्नुवं संमृष्टोति विशेषः। स्थापिते
वेद्यग्रे ध्रुवाश्रुतायदानयोः स्रि पुरोडाशपात्रीणां चसेमार्गः। ध्रुवायामेव चतुर्गृहीतग्रहणं तदासादने।
पात्रीरूपस्तीर्य पुरोडाशमभिघार्य्य वरूणामप्यभिघारणं। उद्वास्य सर्वेषां शाणदानं। तत्र देवतालिंगमंत्रेणाद्यु
त्रेनरूल तदेशो आसाद्य ध्रुवा पुरोडाश वरूणामत्रालंभः।। यज्ञप्रैषौ पुरोडाशोपकारकौ वात्र घ्नावाज्यभागौ
नपश्चूपकारकौ। स्थाल्याज्जुकाम्रु पस्तीर्याग्नीषोमीयपुरोडाशमवघन्नाह। अग्नीषोमाभ्यां पुरोडाशस्यानुब्रूही
ति ति। अवदाय प्रत्यु पस्तीर्यन्तनमभ्यज्यानेहस्विष्टकृदर्थमवघत्यैते वदास्यमानत्वाहं। अतिक्रम्या श्राव्य
डात्याश्राविते आह। अग्नीषोमाभ्यां पुरोडाशं प्रेष्येति प्रेष्यप्रैषः। इदमग्नीषोमाभ्यां नमम।। अथ काण्वश्रुत्यनु
साराद्यज्ञप्रैषाणां माध्यंदिनश्रुत्याप्रेष्यप्रैषाणां दिवमूहविषोप्रचारः हरिस्वाम्यादयस्तु प्रेष्यप्रैषपदमेवाहुः ८
उपांशुदेवतादेवमदेविकाहवौ। षिडिति मन्त्रणात्। सवित्रे सत्यप्रसवायानुब्रूहीत्युक्ते प्रेष्यप्रैषपदे प्रशासा। यज्ञ

प्रैषपक्षे होतुरेवानुवाक्याः॥ आद्यपक्षेऽवघ्नतोऽध्वर्योरनुवाचनं। सवित्रे सत्यप्रसवाय प्रेष्येति प्रत्रास्तारं। स
वितारं सत्यप्रसवं संयजेति होतारमाह॥ त्यागाः स्पष्टाः॥ अग्नये गृहपतयेऽवदानादि। बृहस्पतये वाचेऽनुब्रू
हि। बृहस्पतिं वाचं यज॥ इन्द्राय ज्येष्ठायानुब्रूहि। इन्द्रं ज्येष्ठं यजेत्यादि। रुद्राय पशुपतये। मित्राय सत्याय।
वरुणाय धर्मपतये। अवघ्नप्रैष्यप्रैषपक्षेऽपभृति स्विष्टकृदर्थं सर्वेभ्योऽवदाने द्विश्चाभिघारः। यज प्रैषपक्षे
ऽप्रवर्ग्यः। त्वाम्नमह उत्तमेन चरित्वाऽध्वर्युर्यजमानं दक्षिणेन बाहौ गृहीत्वा ब्रवीति॥ सविता त्वा सवानां
सुवतां वरुणो धर्मपतीनां॥ इमं देवा इंद्रियाय इममं विष्णोः पुत्रं गंगाये पुत्रमस्यै विशऽएष वः कुरवो राजा
एष वः पांचालो राजा सोमोऽस्माकं ब्राह्मणानां राजेत्याह। काण्वानां। माध्यंदिनानां तु इमं देवा असपत्नं सुव
ध्वं महते क्षत्राय इत्यादि राज्ञि यजमाने अमी इत्यत्र तद्देशनाम गृह्णाति। नामास्य गृह्णाति मंत्रे यथास्थानमि
ति सत्याषाढः। अस्यै इत्यत्र तद्देशाख्यं बहुत्वहिंनां तं प्रजानाम गृहणं। अस्यै कौरव्यै विशे अस्यै पांचाल्यै विशे इति का
ण्वश्रुतेः। तेनेदं सिद्धं अस्यै कौरव्यै विशऽएष वः कुरवो राजेति। केचित्तु सब्राह्मणपुरस्कारमात्रेणाऽङ्गत्योपवा

राद्धि प्रविश्य पियक्रमानदेत्राप्रज्ञानामग्रहणमाकुः। तन्त्रयुक्तं। यस्यै विशो प्रजा भवतीति निश्रुत्या सा ज्ञा जाद्वा ए
वसिद्धत्वेनोपादानात्। नविधौ परः शास्त्रार्थ इति न्यायात्। ॥ इदं देवा इन्द्रियाय इमं मे विश्वेः पुत्रं गं गाये पुत्र
मस्यै विशे एष वो राजा सोमोस्माकं ब्राह्मणानां राजेति मन्त्रः। एष वः कुरवो राजेति रामयज्ञाः॥ अथ क्षिप्र
कृत्प्रैष्य प्रैषपक्षे समानयन्नाह। अन्यथा वदानात्पूर्वींपक्षयो मैत्रावरुणो होता वा। अध्वर्युरग्नये प्रेष्येति मै
त्रावरुणो न संचराभ्युक्तो। प्राशित्रावदानादि सर्वं सौमिकं कर्म। प्राशित्रमात्रे सर्वहविर्भक्ष इडायां न चतुर्धाक
रणो। हविः शेषस्य यजमानपक्षे विनियोगो भागास्तु सर्वे स्युः। [illegible] आग्रानरनुवाकास्योक्त नैक्रमी उन्नेतुः
पात्रयोजनकाले। त्रयस्त्रिंशच्छतसहस्रदक्षिणापक्षे आग्रयणस्थाल्यौ अपरेण चतुःस्रक्त्यौदुम्बरांश्चा
दाभ्यपात्रस्य योजने। नन्तोतिरिक्तस्थाल्यै बार्हस्पत्यग्रहपात्रयोजनेतु ज्ञातुर्विश्वरूपाज्यो निर्गानियो नि ५
वृत्तिः। सहस्रदक्षिणापक्षे अदाभ्यग्रहणं त्रयस्त्रिंशद्दक्षिणापक्षे नांशुदाभ्यग्रहणं। सहस्राधिकदक्षिणे तु
नियमेन स्यात्। [illegible] धा एकधनानयनानन्तरे तान्निधाय अभिषवात्पूर्वमध्वर्युरौदुम्बरेण चतुःस्रक्ति

नायहपात्रेण अंशुग्रहं गृह्णाति। तत्सर्वं तूष्णीं। यथा। अद्भिमादायांशूननुप्पतरर्थं कथितामिर्निर्याः प्यामि
ज्ञिरूपासिच्य अद्भिर्दुघम्यानुघम्पवासकं कृत्तस्य पात्रे समुष्टि नांशुं गृहीत्वा आहवनीयं गत्वा हुत्वा जुहोति
सर्वो। इदं प्रजापतय इति त्यागः। ग्रहग्रहणादि होमांतानि कर्माणि रनुवृत्सत्वेछया कुर्यादिति। होमांते हिरण्यं वोप
जिघ्रत्यध्वर्युः। यजमानस्तु अद्य येतु ष्यं द्वादश्वावसतरीं गाभिणीरंशुं दक्षिणां ददामीति ददाति। ज्ञातस्य प्रियस्य
अनूचानस्याव काशावारनवायित्तस्य यजमानस्यांशुग्रहणं। नान्यस्येति। तं स नियोग ष्टमादाप्य भवितुमिच्छोर्यज्ञमा
नस्य गृह्णात्यध्वर्युः। यथा। तस्मिन्नेवांशुपात्रे तूष्णीं निग्राभ्या अथ ग्रावसिच्य क्रमेण त्रीन्सोमांशून्निदधाति। उपयामगृही
तोस्यग्नये गायत्रच्छंदसं गृह्णामीति प्रथमं। उपयामगृहीतोसीन्द्राय त्वा त्रिष्टुप्छंदसं गृह्णामीति द्वितीयं। उपयामगृ०
सि विश्वेभ्यस्त्वा देवेभ्यो जगच्छंदसं गृह्णामीति तृतीयं। ततोनुष्टुप्तेभिगर इत्युक्त्वा आहवनीयं गच्छन् अंशुभिः पात्रस्थं
अप आलोडयति। त्रेष्टीनां त्वापतमन्त्राधूनोमीत्यादि। अदाभ्यं नाम जागृवि तस्मै त्वा गृह्णामीत्यंतेन। तत आहवनीये
सर्वं जुहोति। तस्मै ते सोम सोमाय स्वाहेति। इदं सोमाय। आगत्यांशून्सोमे निदधाति। उ त्रीकू चे देव० पाथोपाहीति प्रथमं
वत्रीत्वं देव० पाहीति द्वितीयं। अस्य मत्स्व त्वं० पाहीति तृतीयं। द्वादश द्वावसतर्योगाभिण्यो धयं दद्यात् ... 

ततोधिषवणोपयुपविशंतीत्यादिप्राकृतं कर्म। तत्र विशेषः। अतिग्राह्यग्रहणाहोमकालातिदेशात्तेषां चागंतु
त्वादंतराग्रयणो ग्रह्या वप्यागंतुस्थानमिमि ह्यास्त्राग्रहणात्। आग्रयणादनंतरं बार्हस्पत्यपात्रे। ततो ग्रहणा
माश्रुवादिप्रकृतिवत्। अथोक्ता बृहस्पतिसवस्य त्रिवृत्स्तोमत्वात् त्रिभिस्तृचैर्बहिः पवमानस्तोत्रं गायेत्प्रकृतिवत्।
अध्वर्युरिग्नीदग्नीन्विहरतेति प्रैषे पशुभ्यामेहीति विशेषः। रामबाजपेयी मधुकरमिश्रप्रभृतीनां मते। अस्मन्म
ते तु नोहः। एवमेव हि ककवासुदेवादिभिर्विचारितं। अथाग्नेयं पशुमुपाकृत्य बार्हस्पत्यस्योपाकरणं। अग्नि
यनं। आग्नेये नियुज्य देवस्त्वा बृहस्पतये जुष्टं नियुनज्मीति बार्हस्पत्यनियोजनं। प्रोक्षणे अग्नये त्वा ओषधीभ्यः
बृहस्पतये त्वा जुष्टं प्रोक्षामीति। आग्नेयस्यांजनं कृत्वा बार्हस्पत्यांजनं। अन्वारंभे अग्निं बृहस्पतिं वन
स्पतिमित्यादि। आग्नेयस्य उल्मोपस्पर्शनं कृत्वा बार्हस्पत्यस्य उल्मोपस्पर्शनं। संज्ञपयान्वगमन्तामिति। संज्ञ
प्तौ पशू इति सामि तु प्रैषः। माहिर्भूर्मापृदाकुरिति नियोजन्योः प्रासनं। आग्नेयस्य प्राणान्त्रोधनं कृत्वा बार्हस्प
त्यस्य प्राणान्त्रोधनं। तच्छेषेण आग्नेयनाभिछेदनं कृत्वा तृणामूलाञ्जनं तृणाग्रस्य सव्यकरणं। तथैव बा ६
र्हस्पत्यस्य तृणमूलयोः प्रासनं। वपोत्खेदनमुभयोः। ताभ्यां वपाश्रपण्योः प्रोर्णवनं। वपाश्रपणीप्रतिप्रस्था
तुः। श्रृतेन प्रचरतेति प्रैषः। आग्नेय वपायागः प्रकृतिवत्। बृहस्पतये छागस्य वपाया मेदसोनुब्रूहीति अनुवाचनप्रैष।

पूर्ववद्वपामार्जनयातिक्रम्याश्राव्य प्रत्याश्राविते आह । बृहस्पतये छागस्य वपां मेदः प्रस्थितं प्रेष्येति । द्विदेवत्यग्रहचमस
भक्षानंतरं मांसाघ दक्षिणस्य हविर्धानस्य पश्चाद् दक्षं निदधेति चमसानध स्तोनाराशंसा आनेश्वदेवात् । इति सूत्रात् ॥
तत्र तत्र निहितेषु नाराशंसेषु गोगणागता एव गा अनयाकृता एकादशकृत्विग्भ्यो दक्षिणा व्यादिशति । अस्मिन्गोग
ण एकादशगणो वो यथाविभागं ब्रह्मादीनामृत्विजां दक्षिणा इति । एकादशशतानि वा । एकादशसहस्राणि वा । त
तोध्वर्युरछावाकार्थं स्थापितं सवनीयपुरोडाशशकलमादाय सदुपहूतास्म इत्युक्तो तिष्ठति इत्यादि प्राकृतं कर्म ॥
पशुपुरोडाशानिर्वापो आग्नेयानंतरं बार्हस्पत्यस्य निर्वापः । अवदानग्रहणमुभयोः पश्वोः । एकशूले एकोस्वायं प्र
क्षेपः । उभयोः त्रिः प्रच्यावयता त्रिः प्रसुतयो हृदये उत्तमे कुरुतादिति प्रैषः । पश्वोः संवदस्वेति च । उन्नेतृ होतृ प्रशा
स्त्रब्राह्मणाच्छंसि आछावाकशस्त्रस्तोत्रेषु विशेषस्तत्तत्त्र योगे लिखितः शेषं प्रकृतिवत् । इति प्रातःसवनं समा
प्तं । इति श्रीमद्विठ्ठलदीक्षितमहायाज्ञिकस्य यज्ञकारयिता च तस्य सूनुः श्रीकेशवदीक्षितश्रौतस्मार्ताग्निमत
त्यज्ञस्तस्य कृतौ यज्ञविधिरत्नगुंफवल्ल्यां कल्पलतिकायां प्रथम ८ परिच्छेदः समाप्तः ॥ ॥ अथापरोगुंफो वि
धीयते धुना ॥ सर्पणादि माध्यंदिनं सवनं । आग्नेयानंतरं बार्हस्पत्यपशुपुरोडाशयागः । बृहस्पतये पुरोडाशस्या

स्यानुब्रूहीति अनुवाचनमवघ्रातः।उपभृतिस्विष्टकृदर्थमवदानं।अतिक्रम्य आश्रुत्य प्रत्याश्राविते बृहस्पतये पुरोडाशं
प्रस्थितं प्रेष्येत्याह।यदि यजमान आज्येनाभिषिच्यत इति पक्षस्तदा शुक्रामंथिप्रचारांते नतच्छेषस्थापनं।तन्न मसः
गाश्चाहुतिर्दाक्षिणाहोमः प्रातःसवनिकीभिः सह दाक्षिणानां तन्नांहोतुर्मनृतीयरात्रे विशेषो ज्ञेयः।तत्र मस
प्यायने प्रकृतिवत्।अध्वर्युरौदुंबरीमनुदग्ग्रीमासंदीं निधाय तस्यां कृष्णाजिनमुत्तरलोम प्राग्ग्रीवमास्तृणाति।
रघंते रोदिति।यजमानमस्यामुपवेशयति यंतासि यमन इति।ततो लौकिकेनाज्येनाध्वर्युर्यजमानमभिषिंचति
शुक्रामंथिसंस्रवेण वा।देवस्य त्वा० संहस्ताभ्यां सरस्वत्यै वाचो यंतुर्यंत्रियेऽभिषिंचाम्यदः शर्मन्नद इति।विश्वे
षां देवानां यंतुर्यंत्रिये दधामीत्यादिना वा।सरस्वत्यै वा० यंतुर्यंत्रिये दधामीत्यादिना वा।ततः प्रतिप्रस्थाता बार्हस्प
त्यग्रहं माहेंद्रमनुजुहोति।यजमानेन सह ऋभक्षणं अतिग्राह्यातिदेशात्॥अथोक्थ्ये हृणांते वाद्यस्मन्निति नौधसं ब्र
ह्मसाम तृतीये पृष्ठे प्रकृतिवत्।नौधसलोपे सत्रुमात्राक भाष्ये दूषितत्वान्नेह विकल्पनीयः॥सर्वेषां सर्वोपि विशेषस्त
त्प्रयोगे ज्ञेयः।भक्षादिप्रकृतिवत्।इति माध्यंदिनं सवनं समाप्तं।तृतीयसवनेऽध्वर्योः पशुप्रचारे आग्नेय्यानंतरं ७
स्विष्टकृतं हुत्वा बार्हस्पत्यस्य चरणं।आग्नेयवसाहोमस्य पात्रांतरकरणं।जुह्वां वसाहोमहवन्यां वोपस्तरणं।बार्हस्प

त्यावदानांतेआग्नेयेनसमस्यस्विष्टकृद्धोमायमोवपातावदानग्रहणं।बृहस्पतेछागस्यहविषोनुब्रूहीत्यनुवाचन
प्रैषः।वसावदानग्रहणादित्यभिघाराः।बृहस्पतयेछागस्यहविःप्रस्थितंप्रेष्येत्याश्राव्यप्रत्याश्रावितेप्रैषः।वसाशेष
समासिच्यदिग्व्याघारणं।निहितेषुनाराशंसेष्वेकादशगाअनपाकृतास्तातीयसवनिकीःऋत्विग्भ्योआदिशति
एकादशानामनिवासहस्राणिवाआदिशेद्यथाकृतं॥भक्षादिप्रकृतिवत्।अथाध्ययोस्तुग्व्यूहनेअग्नेर्बृहस्पतेर्वन
स्पतेरिज्यस्यवसुमतइत्यादिरुक्ताः।अग्निर्बृहस्पतिर्वनस्पतिरिंद्रोवसुमानित्यादिपूर्वप्रभृतेः।अन्यत्सर्वमग्निष्टोमवत्॥
तत्रात्रयस्त्रिंशच्छतसहस्रदक्षिणापक्षेतिस्रोनुबंध्यास्त्रैधातवीयोदवसानीया।संवत्सरावरेषुसत्रेषुसारस्व
तेषुसहस्रदक्षिणावरेषुचेतित्रैधातव्युदवसानीयासर्वत्रेतिवग्वामयनेसूत्रात्।तत्रानूबंध्यायथा।मैत्रावरु
णी१वैश्वदेवी२बार्हस्पत्यावेति३पत्रासादनादिमैत्रावरुण्यानूबंध्याकृत्वा।नियोजनेमैत्रावरुणंतरविश्वेभ्यो
देवेभ्योजुष्टंनियुनज्मि।बृहस्पतयेजुष्टंनियुनज्मीति।प्रोक्षणेविश्वेभ्योदेवेभ्यस्त्वाजुष्टंप्रोक्षामिबृहस्पतये
त्वाजुष्टंप्रोक्षामीतिच॥संज्ञानेमित्रावरुणौ।विश्वान्देवान्।बृहस्पतिं।वनस्पतिं॥मित्रावरुणाभ्यामनुसायाइति
सर्वत्रप्रैषप्रस्थानाद्येनोपलक्षणं॥तार्तीयसवनिकव्यादिषुग्नीनामत्रापाकरणं।प्रैषानुप्रैषाऊहायथायथं

प्रयोज्याः॥ बृहन्ने मित्रावरुणयोर्विश्वेषां देवानां बृहस्पतेरित्यादिरुक्ताः। मित्रावरुणौ विश्वेदेवा बृहस्पतिस्तामपनुदं लि
त्याद्युपलक्षितः। सर्वेषां हृदयशूलानामुपगूहने सुरः स्थानमभिक्रोशते त्यूहः। त्रयस्त्रिंशच्छतसहस्रदक्षिणापक्षे त्रेधा
न वसुदेवसानीयासमारूढनिर्मथनशर्विका॥ यथा॥ अग्न्यन्वाधानादि ब्राह्मणतर्पणान्ते विशेषः। पात्रासादने द्वा
दशकपालानि। हविर्व्रीहयो यवाश्च। एकः पुरोडाशपात्री। दक्षिणास्थाने। ओलिशानमानानिति स्थाने न वर्णालिवा
सांसि तिस्रो गावो नड्वाहो वा त्रयः। अनडुत्पक्षे गौर्वर्जो वाधिकः। अत्र हविर्भेदान्नानाबीजधर्मा भवंति। यथा।
उत्पवनायेति मंत्रावृत्त्या पृथक्प्रसक्तां व्रीहियवयोः। तंत्रेणापन्न व्यनिरासः। अभावे पृथगभिमर्शने। अंत
उदकस्पर्शः। यच्छंतामिति मंत्रावृत्त्या पृथगालंभः। ग्रहणे। इंद्रासविष्णुभ्यां जुष्टं गृह्णामीति मंत्रः। तत्र ग्राह्यमुष्टि
चतुष्टये पृथक्कृत्य चत्वारो भागाः कार्याः। तत्र त्रिभिर्भागैः प्रथमे द्वितीये मुष्टौ प्रथमो भागो व्रीहीणां भागद्वयं ८
यवानां पार्थक्येन ग्राह्यं तृतीये तु मुष्टौ प्रथमो भागो यवानां भाग एको व्रीहीणां पार्थक्येनैव ग्राह्यः। चतु
र्थमुष्टौ भागत्रयं व्रीहीणामेव ग्राह्यं। मुसलपतनोत्पूत्या पृथक्करोपाभिमर्शनं। ओपहणे इंद्राविष्णुभ्यां जु
त्वा

ष्टमिति भेदः। अथाघातार्थं कृष्णाजिनादानादि व्रीहीणां ओहणांतं पेषणं कृत्वा यवानां पेषणाद्योहणं। निर्मंत्रवंति। न
न श्चक्षुषे त्वेति [illegible] इत्या क्रमेण व्रीहियवयोः आकृत्या पृथक् संयुज्य पिंडबंधनं पृथक् रूपिष्टेष्वनी। देवस्य त्वे त्याहृ
त्या पृथक् पिंडयोः पात्र्यां वापः। समापद्य त्या हृत्या पृथक् संयुज्य पिंडबंधनं पृथक् रूपिष्टेष्वनी। देवस्य त्वे त्या हृत्या पृथ
क् पिष्टयोः उपसर्जनीग्रहणं। एकत्वान्न निर्देशः। पिष्टलेपयोः पात्र्यां शुल्कि [illegible] नयोश्चैकीकृत्येरस्त्वती। अधि
श्रयणे व्रीहिपिंडं द्विधा कृत्वैकभाग मध्योयज्ञेऽनिधाय तदुपरि यवपिंडं कृत्वा तदुपरि पुनर्व्रीहिपिंडं निधाय। विश्व
पतिः प्रथनत्वेग्ध्यानेर्ये करोति। ततः पर्यग्निकरणं श्रपणं। उद्धरणं पात्र्यां मुद्गस्थानि धानं। इडा विष्णु [illegible] छेनि प्राणदानी।
प्रियेण धाम्नो [illegible] सद आसीदेति वेघीनन सादनं। आवाहनं देवतार्चीसने अग्निमग्न। सोमो देवा आज्यपं इत्यादि
इडाविष्णुभ्यामनुब्रूहीत्यनुवाचनं। उक्त्युपस्तीर्य तत्पावदानानि गृह्णाति यथा त्रिभ्यो विधानं रूपावदानानि गृ
हीतानि स्रुकु। उपस्तीर्य हतान्यभ्यज्या तिक्रम्याश्राव्य प्रत्याश्रावित आहेडाविष्णू यजेति। वषट्कृते जुहोति। इद
डाविष्णुभ्यामिति त्यागः। अथाग्निरे कवदुत्तरार्धाद्यामवदाया तिक्रम्याश्राव्य प्रत्याश्रावित आहाग्नये स्विष्टकृ

ते यजेत् । दक्षिणाभिमंत्रणे प्रजापतेर्भागः स्योर्जस्वान्पयस्वान्प्राणापानौ मे पात समानव्यानौ मे पातोक्षित
व्यानौ मे पात हिरण्यं गो वासांसि स्थः पसे हिरण्य गो वासोऽजा स्तोर्जस्व विधत्तोऽस्तितीन्यसितपोवास्थ मा मे स्तोद्धु
१ मपुत्रेति । अस्याइष्टे दक्षिणा तिस्रो धेनूर्होतृस्तुभ्यमहं संप्रददे । त्रीणि सुवर्णशतमानानि ब्रह्मणे स्तुभ्यमहं संप्रद
दे । त्रीणि वासांसि त्रीननडुहः श्च वायोस्तुभ्यमहं संप्रददे । तिस्रो गा अनडुत्यसेऽजमेव वाग्नीध्रेस्तुभ्यमहं । बृहन्ने
इंद्रविष्णोकुर्जितिं । अन्यदादीपनांतमग्निष्टोमवत् ॥ सर्वपरि यज्ञेषु च रुत्विग्वरणादि घादीपनांतं पृथ
ग्भवति कालभेदात् ॥ ❖ ॥ ॥ इति श्रीमत्सकलविद्यावागीश्वराधिपति महाग्निचिन्नानाविधा
ष्टयज्ञकर्तृकारयिताय महा याज्ञिकमौलिकुसुमपरागसंवलितचरणांबुरुहसत्यवचसा
स्वाचरणचर्याचारचंचुचु श्री विठ्ठलदीक्षित तत्सुत केशवदीक्षित श्रौतस्मार्ताग्निमत तच्छिष्य आपाजी ९
त्यपराख्यावानन्द महाराष्ट्रदेशवर्य कर्णाटपुरस्थ काशीकृतवसतिस्तस्य कृतौ श्रौतार्णवविधिरत्न
गुंफमालिकाकालांतिकायां बृहस्पतिसवयज्ञो वाजपेयांगभूत एकाहोऽग्निष्टोमसंस्थश्च समाप्तः ॥ ॥

॥०॥ श्रीगणेशाय नमः॥ अथाभिधास्यते सम्यक् विधिर्वाजपेयक्रतुः। अथ वाजपेयः। तस्य कात्यायनः सप्तदशा
दीक्षा आह। एकाहत्वात् साकल्यश्च तिस्र उपसदः स्युः। एकस्सौत्यं दिनमित्येकविंशति दिनानि। तत्र यद्यपि दीक्षाप्रभृ
ति शुक्लपक्षे इति दीक्षोपसत्सुत्याः शुक्लपक्षे सूचिताः तथापि सौत्यस्य प्रधानत्वात् आश्विनपौर्णमास्यां कार्तिक्यां वा पौर्णमा
स्यां सुत्या युज्यते। ततः पूर्वं कमेकविंशत्यां कृष्णद[illegible]रम्भः। एवं वैकादशादीक्षा अपि शुक्लपक्षे कर्तव्याः स्युः। स
प्तदशादीक्षाः सप्तदशापवर्गा चेति आश्वलायनमते। अत्र छंदोगसूत्रे यं ब्राह्मणा राजानश्च पुरस्कुर्वीरन् स वाज
पेयेन यजेत। तस्याप्यमावास्यां दीक्षित्वा त्रयोदशादीक्षाः स्युः सप्तदश वा। अमावास्यायां दीक्षित्वा। मासमिति गौतमः
संवत्सरमिति धानंजय्यः। षडुपसत्कश्च साग्निचित्यश्च स्यादिति। आश्वलायनोपि सप्तदशादीक्षाः सप्तदशापवर्गा इ
ति। शांखायनोपि। तस्य त्रयोदशादीक्षा तिस्र उपसदः सुत्यं सप्तदशाहमहरिति। त्रयोदशादीक्षा उक्तास्ताश्च पौर्णमा
स्यामारभणीया उक्ताः। तत्रापि सौत्यस्य पर्वण्यनुष्ठानं प्रतीयते। तत्र वा अमावास्यायामारम्भो मासदीक्षापक्षे। अमावा
स्यायामारम्भः संवत्सरदीक्षाः षडुपसदः साग्निचित्यश्चेति पारयज्ञभेदश्चात्र

बहुविधउक्तः सततएवावधार्यः॥ गणपतिपूजनादि विधाय प्रधानसंकल्पं तत्र सप्तदशशतगोवस्त्राजाविस
प्तदशानि ष्कं वृषली हस्तिबद्धकमहानसरथदक्षिणेन सप्तदशस्तोमेन रथंतरपृष्ठेन वाजपेयेनाहंयक्ष्ये
तत्रैभिर्वस्त्रालंकारादिभिरर्चितस्त्वं मे ब्रह्मा भव तथा षोडशर्त्विग्वरणं॥ कात्यायनसूत्रे तु सदस्यः सप्तदशोऽभि
१० यते। निष्कः सुवर्णैश्चतुर्भिः अशीतिगुंजसुवर्णं॥ बद्धकमन्वेष्यैर्वाधिचतुरस्रं यानं॥ कात्यायनसूत्रे तु स
प्तदश सहस्राणि गवां। अश्वाश्च सप्तदश्याधिकाः शकटानि च सप्तदश शतानि। हस्तिनां हिरण्यकक्ष्यमाश्व
लायनेनोक्तं। शताधिकानां द्विशत्याद्युक्त्वैकस्मिन् नागजादीनां नानापरिमितो गणो दातव्यः। इत्याश्वला
यनस्य वैकल्पिकं पक्षांतरं। महानसं महारथः महद्वृत्तवअनश्वेति। शांखायनः सप्तदश गवां शतानि
दत्तानि सप्तदश वाससां सप्तदश यानानि युक्तानि हस्तिनो निष्कान् दुंदुभीन् स्तानि सप्तदश सप्तदशानि भव २०
ति। स आप्ता वाजपेयो वयसो वयसः। मानवे दासीर्लोहोमो कृत्वा सप्तदश सप्तदशानि ददाति। सप्तदशानि
श्चान् सप्तदश मालाः सप्तदश दासीः सप्तदश हस्तिनः सप्तदश गवां शतानि सप्तदश गावीनां सप्तदशाजीनां स

मद्वारथाभ्यामदर्शारोहणानिसमन्वारम्भस्थानानिपुष्कले॰ इरजित्वायजुयुनक्तिमध्वर्यविदहाति॰गाङ्
यतोनयंतिमध्यतश्चतराणिपश्चात्पथानीति।काठकेवाराहश्रुत्यावाकेप्येवमेवास्ति॥अथयइष्ट्यापश्चा
नासोमेनवायजेत सोमावास्यायांपौर्णमास्यांवायजेतेतिश्रुत्यंतरानुसाराच्छरद्वेदिषुत्यास्यात्॥नि
दाशुक्लपक्षेपिदीक्षारंभः॥ [illegible] दीक्षाप्रभृतिआदीपनांतेविशेषः।प्रचारकालेस्वाग्विनार्थमृत्विग्भ्यःप्राग्वत
यजनतोषणाद्धिरण्यमालासमर्पणं।हेतुस्तुवज्रमिङः स्नातपुष्कराःस्वर्णमालाश्चकात्यायनेनोक्ता।होतृ
वदन्येषामपिमहर्त्विजामुपयुज्यते॥यजमानस्यपत्न्याश्चहिरण्यमालाबंध [illegible] नास्रुदीक्षाया
निरूप्याज्यमधिश्रित्यनयेस्रुक्स्रुवसंमृजा।उद्वास्योत्पूयपरोवेश्यसकृद्घृतसमिद्धुति [illegible]
येन्नुहोति ॐ देवसवितः॰स्वदनुस्वाहा।इदंसवित्रे।वाजपेयाग्निष्टुतप्रधानयजनीनांसागानांउ
रस्माद्धेयमाहुतिः।नन्वत्रदंगप्रयाजादीनामपिपुरस्तात्कर्मत्वाच्चोदितावदीक्षणीयारंभेपुनराहु
तिः।दाक्षणीयायाएककर्मत्वात्तदातैसकृदेवअग्नीषोमीयप्रचारानंतरंदेयमाहुतिर्नहूयतेतत्त्रा

स्तुत्यायाइतिस्त्रात्। तेन क्रयणवेद्यारंभणध्रुवग्र्योत्सादनाग्निप्रणयनहविर्द्धानाग्नीषोमीयाणां।
सद आग्नीध्रीयधिष्ण्यनिवपनवसतीवरिग्रहणपरिहरणेषु च तत्तत्कर्मादौ भवति। ये साक्षाद्वाजपेयी
गर्भूतायज्ञतया दीक्षणीयास्तत्प्रादिष्ठे वेयमाहुतिर्न तदंगभूताप्रयाजादीनामादिषु। क्रयणेतावद्ध
तुर्गृहीतग्रहणास्वाकृ॥ वेद्यारंभणे च पौर्वाह्णिक्या ध्रुवश्च प्रवर्ग्योत्सादने तत: प्राप्स्यदंत्रोपरिष्टमभि
धाना स्वाकृ। अग्निप्रणयने च प्रवर्ग्योत्सादनीते प्रणयनीयाधानात् पूर्वतो हविर्द्धानेप्रणयने तु उपय
मन्नुपनिर्वपनीते पृथ्वास्मू भयतो निधानात् स्वाकृ। अग्नीषोमप्रणयने चाग्निप्रणयने वा [illegible] प्रण
यनानंतरं। सदः करतो अंतः पास्यात्स्वक्रमताम्यो दुंबर्यंथतत: स्वाकृ। आग्नीध्रीयगृहकरणाच्च पूर्वं
एं इमसीति कृत्वा धिष्ण्यनिवपनात्पूर्वं आग्नीध्रीयसमंस्कारात् स्वाकृ। न सतीवरिग्रहणे च अग्नीषोमी
यवपामार्जनांते। तद्धविर्ग्रहणानुव्युत्क्रामतेति प्रैषांते। दीक्षासु च कस्मिंश्चिद्दिने व्रततोषनाधिश्रयणांते २२
यूपाहुत्या दिग्यूपच्चतुष्टयाहरणांतं प्रकृतिवत्। यूपे तु विशेष:। स सप्तदशारत्निरूपाग्रतर्ते वा नतीक्ष्णा।

यः समायोगोधमपिष्टमयचरवाल्कः। साश्वबाल्वर्वीजनादि सिद्धयेयं साध्यसंज्ञो ष्यवत्यनुक्तलक्षणः। साग्निचि
त्येनु इष्टकापश्वादि यथाकालं कृत्वा दीक्षणीयायामादित्येभ्यो घृते चरुरित्यादि ओत्रमण विशेष इंदु शिक्यासंदीक
रणा विशुक्रमबास्तशाखो विशेषोस्मद्ब्रयन पद्धतेरवधार्यः। कस्मिंश्चिद्दीक्षादिने महावीरकरणं प्रकृतिवत्। प्रथमोप
सद्दिने च व्रतकरणाश्लेषां तेप्रायणीयादि क्रियते। तत्र प्रथमं सावित्र्याहुतिः। तत्प्रायणीया। सोमक्रयणार्थं पूर्वं सावि
त्र्याहुतिः। तत्र वाजपेयस्य षोडशिविकारत्वात् श्रुंठ्या शुष्कांगया। अधिकेोहाकर्णी चक्षुषोः अधिकं बकर्णीया भो
डशिनः। सोमक्रयण्या एकाहघृहगतो प्यविशेषादितिए काहेषु सत्रणात्राहत्रये न सोमक्रयणीहस्यात्। तत्रश्रुण्वेतिप
रमुखी वेष्टितमुखीत्यन्ये। पीनपुच्छेत्यपरेऽङ्कः स्वेति नरआहुः। अधीनोहाकर्णीतिलोहितकर्णी। सोमक्रयणकाले
नेष्टा सोमक्रयणे द्रशादक्षिणतः केशावादीर्घकेशात्पूरुषात् सीसेन परिस्नुत। सिद्धायास्तद्धव्याणां वा क्रयणं क
रोति। द्रव्यक्रयणपक्षे पृथक्पृथक् द्रव्याणां क्रयणं। तत्र प्रश्नप्रतिवचने यथा। सुरा सोमविक्रयिन्क्रय्यास्ते सुरासोमा३
इतिनेष्टा। क्रय्या इति विक्रयी। तान्येते क्रीणानि इति नेष्टा। क्रीणीहीति विक्रयी। सीसेन ते क्रीणानीति नेष्टा। क्रीताः सुरा
सोमा इति विक्रयी। एवमेकैकद्रव्यक्रयः। द्रव्याणि तु त्राप्यं निरूढ व्रीहयः। तोक्मा विरूढा यवाः। २८ गडाश्रेष्ठव्रीहयः ३

व्रीहिमंडः॥४॥श्यामाकमंडः॥५॥तण्डोदनो॥ग॥कुधं येति।सत्रोक्तानि सौत्रामण्यां द्रव्याणि॥कुवलकर्कंधुबदराणि श्री
पानोक्तान्यपि केचिद्व्यगणे तद्भावयंति।तत्र कुवलानि·आमबदराणि·आमानकर्कंधून्यातीत्यनाशाककर्कंधून्य
दुपक्वानि·अनुपजीव्यानि कुवलानि बदराणीत्यने॥१०॥बदराणि सुपक्वानि·प्रसिद्धानि॥११॥अन्यानि च द्रव्याणि कि
त्वादीयानि·नग्नहुनामकानि सुरा त्रास्त्र प्रसिद्धानि।यथा।सर्जत्वक्चित्रकञ्चैव शुंठी चैव पुनर्नवा।जातुजीत
कसंयुक्ता पिप्पली गजपिप्पली।वचोधिकाकृष्णछत्रे चित्रकं चेंद्रवारुणी।अश्वगंधा सममुत्पाद्य मूलान्येतानि द्वितो
ता।धान्यकं वर्षवानीयजीरकेककृष्णजीरको द्वे हरिद्रे च व्यत्ये वविरूढा व्रीहयो यवा इति।तत्र विरूढा व्रीहयो यवाश्च पू
र्वोक्ताः।अन्यानि चतुर्विंशतिवस्तूनि।सर्जः सालस्तस्य त्वक्।चित्रकस्त्वहरीतकी विभीतकामलक कल्कपा।न्यत्रहुगानके
लक्पत्रकेव्वानागकेसरकूपे।१॥वेंत्रोधिकावंशकरीरः।हिहछत्रं महछत्रं।वेत्राधिकादीनि पंचमूलानि सेवा।क्रीतेसो
मेऽनसा पर्युह्यमाणे नेष्टः सुरोद्रव्याणामनुग्रहणं सिद्धक्रीतायावासुरायाः।दक्षिणद्वारे णचात्वालं प्रवेश्य दक्षिणपक्षे द १२
क्षिणाग्नेः पक्वला त्राला नैर्ऋत्यकोणे नेष्टा सुरां क्रीत्वा स्थापयति।तत्र द्रव्याक्रयणपक्षे करणमुच्यते।तत्र तूष्णीं पद।

र्थाः। उलूखलमुसलं॰ दृषदुपलं॰ शूर्पचरुस्थाली॰ कुम्भी सुराद्रव्याणामुपकल्पनं॰ दक्षिणाग्निसमीपे। अवहत्य
फलीकृतव्रीहिश्यामाकयोर्लौकिकोदकेन पृथक्चरू दक्षिणाग्नौ पक्त्वा तदा वामकुम्भ्यां निषिच्य॰ नग्नहु चूर्णं पिष्ट्वा
ॐ दनाभ्यांसह कुम्भे क्षिपति। दुग्धं चावपति॰ ततः पिधाय तत्स्थाने कृतकोणगर्त्ते निदधाति [illegible] तिथ्या॥
तत्राहो सावित्र्याहुतिः। ततइष्टिः। प्रवर्ग्यशांतिकरणात्पूर्वं सावित्र्याहुतिः ततः प्रवर्ग्यः। एवं प्रातिप्रवर्ग्ये। उपसदादौ
सावित्र्याहुतिस्ततउपसत्। एवं प्रत्युपसत्। इति प्रथमोपसद्दिने विशेषः। द्वितीयोपसद्दिने पौर्वाह्णिक्याप्रवर्ग्यपयज्ञवे
दिमानात्पूर्वं सावित्र्याहुतिः [illegible] तृतीयोपसद्दिने प्रवर्ग्योत्सादनेऽन्तःपात्यपरिघमध्ये निधानात्प्राक् सावित्री। अ
ग्निप्रणयने प्रणयनीयात्पूर्वं सावित्री। हविर्धानप्रवर्तने रूपयमन्तुप निवपत्यं तेऽनसोः एथ्यासुभयतो निधा
नात्प्राक् सावित्री। हविर्धानगृहस्य दक्षिणभित्तिं भित्त्वा परद्वारकरणं सुरार्थं। सोमग्रहणाद्यर्थं खरं कृत्वा दक्षिणहवि
र्धानानसोऽक्षस्य पश्चात् सुरार्थं खरकरणं। सदः करणे ततः पात्यावृष्ट्यक्रमणं॰ ततः पूर्वं सावित्री। आग्नीध्रगृहकरणे यसा
वित्र्यनंतरं करणी। धिष्ण्यनिवापे च सावित्र्यनंतरं भस्मसंस्कारादि निवापः। आग्नीषोमीयपश्वारम्भे च सावित्र्यनंत

रं वा यस्यति त्रैषादिः ॥ अग्नीषोमप्रणयने ऽद्भ्रतेष्वन्ते प्रणायनीयाधानात्पूर्वं सावित्री ॥ यूपपरिव्ययणांते सप्तदशा
वासोभिर्यूपवेष्टनी । ऊर्ध्वगेभ्यधिकरणं याऽवाद्रूडवह। अग्नीषोमीयवपामार्जनांते वसतीवरीग्रहणे सावित्र्याहुतिः
वसतीवरिपरिहरणे च पशुकामते ति शेषांते सावित्री। साग्निचित्ये पि चयनक्रियादिसंचितिकर्मणा। मंत्रसंस्कारपरत्वा
13 दग्नेश्चान्तरवेदिस्थानापन्नत्वात्तत्र चाहुतेरभावान्न सावित्री। एवं कर्मांतरधर्म्यंगेषु नाहुतिः॥ सवनीयत्रयस्यार्थे
धिघर्मर्थिंचापाकं न परिवाप्यो षड्गं चतुष्टयं दोहनानंतरं प्रातःसवनिकसवनीयपयस्यायावत्स्थानपाकत्वा
न्येषां सप्तानां षड्गुणं त्वान्तूष्णीमपाकेरणं यन्नमानोपेकार्थमन्यत्र कृतिवत् । [illegible] प्रबोधनाद्दो
विषयाः॥ पात्रासादने सौवनस्थावपाश्रपण्यः । ईडाचर्ये छेदस्व। माहेन्द्रोंतेव सोत्रं वीरपद्मे [illegible] । गयागार्थं
थकृतृतीया वा । अजमेषयोः पाकवैज्ञाम्याते । यद्यपि मारुतश्च दशजेषु भ्यो वत्सा एभि रुक्ता वत्सा वस्यात्मो १३
हु श्चिद्विधित्राडिति न्यायतो वपाश्रपणी षड्गमुखवाचयं च सिद्धं तथापि कलौ गोपशोर्गर्हितत्वादत्र स्थाने मेषो गत्व
ते। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु। इति स्मरणेन गोर्मेष्यास्थानापन्नत्वं तद्धर्मप्राप्तिस्तेन च मीमांसायां

=हविर्धानस्यापरेणैतावद्भिर्दिवसैर्निष्पादितो॰

विचारितत्वात्। तस्याश्वैंऽऽेणमेषेणासहपाका ह्यं वपाश्रपणी चतुष्टयमेव भवति॥ ॥उन्नेतुः पात्रयोजने। आग्रय
णस्थाल्यामपरेण चतुस्रक्तेरौदुम्बरस्यांश्वदाभ्यपात्रस्य योजनं। तदपरेण त्रयाणामतिग्राह्यपात्राणां। ततः
षोडशिपात्रस्य चतुःस्रक्तेः खादिरस्य। ततः पंचानामाप्यैडपात्राणां। ततः सप्तदशानां ग्रहपात्राणां तृतीयसवने चम
सघवनेयानां योजनं। मधुग्रहार्थं हिरण्मयपात्रस्यापि योजनं॥ ॥अथाध्वर्युरेकधनाः यदा अपरात्रे हवि
र्धानमध्ये उदकपूर्णा आनीय प्रवेशयति तदा॰ यमग्नेपृत्सु॰ रिषः इत्यनेन स्वाहाकारान्तेन॥ प्रविष्टास्वेव वा विना
मंत्रं षोडशिविकारात्। ततस्तु नानेन मंत्रेण प्रवरणी षष्ठहोमो नास्ति प्रथमपरिधिछदिरान्तेभ्यो॥ अग्नि
होमोत्थ्या अतिरात्रे प्रहितो॥ प्रवेश्यमानासु चैकधनासु नेष्टाख्युरीपाश्चिमेन द्वारेण प्रवेश्य पश्चिमखरे निदधाति।
दक्षिणतः संधिं करोति इति संधिकरणं प्राग्उक्तेन संधिना सुराग्रहसंबंधीनि सप्तदशावारणपात्राणि आह
त्य एकस्मिन्महति ज्ञाणकुलशामसद्योधारणं। पावनपात्रे महरपाकान्स्यं माहृत्य गोश्ववालमयेनैकेतोदशा
पवित्रेण सुरां पृथक्स्वारणपात्रेषु नाति। रसरूपां मन्त्रादि वेचयतीत्यर्थः। दक्षिणतः पात्राण्यभ्यवहनीयता

वस्त्वन्तरारवायी। अन्यत्सर्वं त्रगारवांतरात्।। अथ आनीतासु एकधना अपोनिधायाभिषवामर्वं मौदुंबरे पात्रे तु अ
क्लिनापात्रेणांशुं यह गृह्णाति। तस्य प्रदक्षिणा प्रतिग्रहात्रे सर्वकर्म बृहस्पतिसववत्रे। ततोऽदाभ्यग्रहणं
तस्यापि दक्षिणादानात्ते सर्वकर्म बृहस्पतिसववत्।। कुत वाजपेयसंस्था वाजपेययोन्नेश्वदाभ्यौ सहस्राधि
14 कदक्षिणाभावादिति। केचित् वाजपेयराजसूययोर्ग्रहीतव्यमिति श्रुतत्वात्। अंशुं गृह्णाति सर्वत्रायै चेति
श्रुतेः वाजपेयो कर्त्तव्याश्च भवतीति। सत्यं महावाजपेये एव भवतीन संस्था वाजपेये। स्थित्वात्। त्रगारवांतरीयाके
त्याश्च। महावाजपेयं अकृत्या कृत्याश्च।। वाजपेयज्ञात्याकोत त्वेन भवतु इति।। ततोऽधिषवणपयुपाक्री
तीत्यादि आग्रयणाग्रहणांतं कर्म। ततो नियोऽभ्याधारा तो गृह्णाति। अग्नेपवस्वचपा० पोषं उपयामगृहीतोस्य
ग्नये त्वा वर्चसे गृह्णामीत्याग्नेयं।। त्वापवित्रस्ये मटंसादयेघोनि मारवरे। एषते योनिरग्नये त्वा वर्चसे सादं
यामि इति।। ततउत्तिष्ठ ओजसा० कृत्वा उपयामगृहीतो सीन्द्राय त्वौजसे गृह्णामीति द्वितीयमैन्द्रं शोऽत्वापवि १४
त्रसंमटंसादयेघोनिनारवरे। एषते योनिरिंद्राय त्वौजसे सादयामीति। ततः अदब्धमस्य० यथा उपयामगृ

॥ऋभुषदं चाघृतसदं इंद्राय त्वा जुष्टं गृह्णामीति द्वितीये। दशापवित्रे संमृष्टं सादयेद्योनिना स्वरे। एष ते योनिरिंद्राय त्वा जुष्टतमं।
पृथिविसदं चांतरिक्षसदं मिति तृतीयं। १
हीतो सि सूर्याय त्वा भ्राजायस्वा दयामीति तृतीयं सौर्यं॥ सौं दशापवित्रसंमृष्टं सादयेद्योनिना स्वरे। एष ते योनिः सू
र्याय त्वा भ्राजायस्वा दयामि। ततः षोडशिने स्वादिरेण चतुः स्रक्तिना धारातो गृह्णाति। आतिष्ठ वृत्रहन्नु थं० वग्नु
ना उपयामगृहीतो सींद्राय त्वा षोडशिने गृह्णामीति। दशापवित्रसंमृष्टं सादयेद्योनिना स्वरे। एष ते योनिरिं
द्राय त्वा षोडशिने सादयामीति। युक्ष्वा हि केशिना० चर। उप० सींद्राय त्वा षोडशिने गृह्णामीति वा षोडशिग्र
हणे। प्रजापतिर्ग्रहस्य ग्रह णस्य काले त्र्यं० षोडशि ग्रहणस्य च काले चतुष्टयस्य॥ तथापि प्रातः सवनेति ग्राह्या ना
हीत्वा षोडशिनं पंचवैंद्रानिति सूत्रादिरैव ग्रहणं। ततः परेंद्रा न्याञ्जपेय ग्रहान्गृह्णाति धारातः। ध्रुवसदं त्वा नृषदं
इंद्राय त्वा जुष्टं गृह्णामीति प्रथमं। दशापवित्रसंमृष्टं सादयेद्योनिना स्वरे। एष ते योनिरिंद्राय त्वा जुष्टतमं। अप्सु०षदं
मिति चतुर्थं। प्राजापत्याड्डितविधितिपंचमं॥ ततो परान्समदशाग्रहान्गृह्णाति धारातः उपयामगृहीतो सीति
योजितः समदशापात्रेषु॥ दशापवित्रे संमृष्टं। तदेवं च नेष्टा अध्वर्युणा वैकस्मिन्गृहीतं त्वराऽन्यत्पात्रे समदशा।
सुराग्रहान्गृह्णाति। उपयामगृहीतो सीति संगृह्य नेष्टाध्वर्युरूपयुपर्यासं नयति। नेष्टा त्वधो प्रासं। अध्वर्युः पा

सस्यपश्चान्नीयेते ग्रहाः नेष्टा वा सस्य पुरस्तादिति। नचास्यातिक्रमणं कार्यं ताभ्यां। अस्त्रश्चवकं प्रविष्टं तिर्यक्काष्ठं। तत्राध
र्योर्नेष्टुं श्चो पर्यध श्च्यधारणे मंत्रः संपृचोस्थ· संमा भद्रेण पृङ्क्तमिति। आहरणे वोभयोर्मंत्रः। विपृचोस्थ विमा पाप्मना पृङ्क्तमि
ति। संमृज्य पूर्वापरस्वरसादने च एष ते योनिः सादयामीति। ततोध्वर्युर्हिरण्मयपात्रेण मधुग्रहं गृह्णाति स्वरे च सादयति। मधु
नश्चाप्रदेयत्वान्नोपयामयोनी।।।। ननु आदित्यग्रहणमग्निष्टोमवत्।। ततो पर्हिः पवमानानंतरं· अग्नीदग्नीन्विहरेत्यादे
15 प्रतिप्रस्थातः पशुभिरेहीति राममवाजपेयी विद्याकमादिमते· स्वमते तु पशुनेहीत्येव· रत्नेश्वरमिश्रास्त्वेवमेवमन्यंते।
धिष्ण्यविहरणादि वपामार्जनांते विशेषः। यूपं परिवीय त्रिरात्रपशूनुपाकरोति। यथा आग्नेयं ज्ञाग्नेच्छागानुपाक
त्येंद्रं मेषमनुपाकरोति। वत्रावंध्या· पृश्निश्चिजा·। पृश्न्यभावेऽपृश्निमपि। कल्पेतु गोपत्रो निषिधास्तच्छागो नेमेषालाभः।
प्राजापत्याश्चरम्यामाः स्तूपरान्बस्तान्सप्तदश पशूनुपाकरोति। तूपराः शृंगोत्पत्तिकालेप्यजातशृंगाः। बस्तानू अतिप्रजन
समर्थान्।। एके षोडश पशून्प्रजापतय आलभ्य सप्तदशं वायव आलभंते। सर्वेषां वा सप्तदशानामभावे कतिपयेऽपित
रुणाः स्युः। तत्र प्राजापत्यानामेवोपांशुत्वं· नान्येषां।। एतानि च सप्तदश प्रधानकर्माणि। तेनैकस्यापि वैगुण्ये न सर्वा १५
वृत्तिः। एकदेवतात्वात्तु सकृत्प्रक्षेपः। तत एव च पशुपुरोडाशस्यैकस्यैव सर्वोपकारकत्वं प्रयाजाद्युपभागवत्।। अत्र

सर्वेषां पशूनां पदार्थानुसमयो न काण्डानुसमयः। यथा सर्वेषामेकतृणेनोपाकरणं। ततो मैथनं शाकलादाना
घाभिहोमांतं। उपाकरणमंथनयोर्वैकल्पिकत्वेप्यत्र नियमः श्रुतिस्तु याज्ञिकत्वात्॥ तथा च मधुकरधन्विवा
सुदेवैश्च ग्रंथे निरूपितत्वाद्धि॥ ततः सर्वेषां रशनाभिः शृंगांतरे बंधनं। ततो देवस्य त्वा सवितुः प्रसवेश्विनो०
भ्यां। अग्नये जुष्टं नियुनज्मि। अनेन मंत्रेणाग्नेयं यूपवत्सौ इन्द्राग्निभ्यां जुष्टं नियुनज्मीत्यैंद्राग्नमाग्नेयगले बध्ना
ति। ततः इंद्राय जुष्टं नियुनज्मीत्यैंद्रमेषं। ऐंद्राग्नगले॥ ततः सरस्वत्यै जुष्टमिति छागं। मेषी वा। ऐंद्राग्नगले॥ ८
ततो मरुद्भ्यः कुक्षेषभ्यो जुष्टमिति सारस्वतगले वत्सां। ५॥ ततः प्रजापतय इति प्राजापत्यं मारुतगले निबध्यते
परमेवं गलगलके कृतया सप्तदशानामपि [illegible]। वायवे जुष्टमिति। अंतिमस्य वाषोडशानामप्राजापत्यगले बंधनं॥ त
तोऽद्भ्यस्त्वौषधीभ्यः० सप्तपथाः। अग्नये त्वा जुष्टं प्रोक्षामीत्याग्नेयतः प्रोक्षणं। १। इंद्राग्निभ्यां त्वेत्यैंद्राग्नस्य। इं
द्राय त्वेइस्य मेषस्य। ३। सरस्वत्यै त्वेति सारस्वतस्य छागस्य मेष्या वा। ४। ततो मरुद्भ्य उक्षेषेभ्यस्त्वेति वशायाः। ५।
ततः प्रजापतये त्वेति प्रत्येकं सप्तदशप्राजापत्यानां॥ सप्तदशस्य वायवे त्वेति वा। यथानियोजनं प्रोक्षणं॥ होतुः सप्त

स्वासांमिधेन्येत्यादि लोतुः त्रयो गावस्सरेस्माभिःप्रोक्तं॥ ततः अंजनेतैनैव क्रमेण स्वलारोपस्यवनिं च। आग्नेय्यादि
वशानां प्राजापत्यानां च युगपदुद्वयनं क्रमेण। चतुश्चत्वारिंशत्स्वरुणान्यादत्ते· एकैकं यातिद्वेद्वे। ततस्वरुणं·
निधानादि संज्ञपयान्वगमन्निनिश्रेषः सर्वेषां। संज्ञप्ताः पश्वावइति त्रामितुः। परिपश्वाव्याकृतिस्तोत्रेणसर्वेषां
माहिर्भूतंमापृदाकुरिति नियोजनीयानां प्रासने। आग्नेये आग्नेदाणा सारस्वतस्य वशायाः प्राजापत्यां
वततच्छेद्यप्राणनुबोधनेक्रमात्॥ ततः पश्चाग्निषेकानंतरं स्वरुणनिधाननाभिच्छेदनतृणमूलांजनतृणायस्या
सव्यहस्तकरणं· एवं सर्वेषां॥ ततो स्वरुणामूलानां निरसनं निरस्तः ररक्ष इति। क्रमेण वपोत्खेदनपरिवास
ने· सरस्वत्या मेषीपक्षे अन्यवपाश्रपण्यो॥ गोपशोः कृत्वाव भावेमकृष्णउर्णोषेभ्यो मेषी तस्या वपा· सार
स्वत्या मेष्या वपाश्रपण्यां प्रोर्णूयते। यदि तु सारस्वती मेषी तदा माकृत्याए वान्यवपाश्रपण्यो भवतः। प्रा १६
जापत्यवपानां आग्नेयवपाश्रपण्योरवप्रोर्णवनं। सर्ववपानां चात्वालेवसेकः। त्वामित्रेप्रतपनं। हवि
शामिष्टिणा यजासनं। प्रतिप्रस्थाता तु श्रपणं सर्वासां। श्रुताः प्रचरेति प्रेषः। पृथक् पात्रेषु कृत्वा पाणादानं॥

अग्निं गच्छेत्याग्नेयवपायाः। इन्द्राग्नी गच्छतमिति। इन्द्रं गच्छ। सरस्वतीं गच्छ। श्यामकृतऊह्ये षान्ताच्छेपः। प्रजापतिं गच्छ। वायुं गच्छ वा
सर्वासां क्रमेणासादनं क्रमेणालम्भः। तत्राग्नेययागः। अग्नये छागस्य वपायै मेदसोनुब्रूहि। वपां मेदः प्रस्थितं प्रेष्येति
प्रैषः। इन्द्राग्निभ्यां छागवपां मेदः प्रस्थितं प्रेष्य। इन्द्राय मेषस्य वपायै मेदसोनुब्रूहि। इन्द्राय मेषस्य वपां मेदः प्रस्थितं प्रेष्य
सरस्वत्यै छागस्य वपायै मेदसोनुब्रूहि। सरस्वत्यै मेष्या वपायै मेदस इत्यादि वा। सरस्वत्यै छागस्य मेष्या वा वपां मे
दः प्रस्थितं प्रेष्य। एवं यागं कृत्वा अत्र वक्ष्यमाणः प्रचारः। माहेन्द्रग्रहान्ते वा भविष्यति। अत्र चेत् श्यामकृत्स्नऊह्ये षेष्यऊह्या या
वपां मेदः प्रस्थितं प्रेष्य। कल्पोगोमेष्या प्रत्तिनिधाने विज्ञाकृतो स्त्येव मन्त्राणां त्रयाणामूहः। तद्रूपलाभप्रतिनिधेः प्रतिनिषिद्ध
वीति न्यायश्च॥ गोवा च कर्त्राह्वो स्वास्तिक तत्राहू प्रयोग एव। अथ प्राजापत्यानां। अत्र वा वपाप्रचारः। वामदेवग्रहा
न्ते वा भविष्यति। अत्र चेत् प्रजापतये उपांशु मनसा। छागानां वपायै मेदसोनुब्रूहि। इत्युच्चैः॥ उक्तामुपस्तीर्याद्वितीय
त्वाकल्पमवधाय सर्वाद्धिरभिघार्यातिक्रम्याश्राव्य प्रत्याश्रावित आह। प्रजापतये। इत्युपांशु। छागानां वपां मेदः प्रस्थि
तं प्रेष्येत्युच्चैः। समन्त्रास्य पञ्चावग्धिवत्तल्पपक्षे वा येच्छागस्य वपां मेदः प्रस्थितं प्रेष्य। माहेन्द्रान्ते वा वत्राग वपाप्रचारपक्षे
विज्ञाषडुच्यते। तत्रावदानानि त्रोहवत्विभागाश्च भिन्नपात्रेपच्यंते। सोविष्टकृतानि तु औपभृतानि त्र्यंगानि पृथक्

पात्रेपर्यंते। तदास्य काल एव प्रधानजौर्वावदानयागः। जोहवेभ्य एव स्विष्टकृदंतेष्वंगानि विशेषस्व प्रजायेदलानि। स्व
कालेचाप्राकृतेव त्रावपाप्रचारः तस्मिन्पक्षेऽंगानां पृथक्प्रयोगेन। अस्तनं च तत्रा विशेषः प्राजापत्यवपानां हविषां चवैकृ:
त्यिकः कालविशेषः। मैत्रावरुणप्रैषावसाने वा मदेव्य ग्रहहोमांते प्राजापत्यवपाप्रचारः। स्रुच्यूहनात्प्राक्कुहृदया
दिप्रधानहविषां प्रचारः। तदनु सौविष्टकृतप्रचारः। प्राकृते काल एव वा प्राजापत्यवपाहविषः प्रचारः। वपामार्ज
नादि प्रकृतिवत्॥ नाराशंसभक्षणं। वैश्वदेवग्रहणं सादनांतं। द्रोणकलशस्य सकलस्याशुक्रस्य प्रतभक्ष
सकः। अस्ताधोद्रोणकलशस्थानि धानं। तदुपर्येकतोदशपवित्रनिधानमित्यादि प्रकृतिवत्॥ अथाग्नीत्प्रिषु पु
रोडाशपूर्वकं सवनीयान्सवनीयान्निर्वपस्तदंते वनेचारस्पन दशशरावं बार्हस्पत्यं चरुं निर्वपति। नीवारास्तत्र धान्या
नि शरावः पात्रविशेषः। तं याज्ञिका नियमस्त्रीनाप्रादेशाद्दृत्तं पात्रमाहुः। तदाभीयं प्रयाय प्रागदेशाई न कल शाहवि
रत्वात्। तत्र प्रकृतिवदित्यनिदेशप्राप्तं चतुःसंख्यानुग्रहार्थं मुष्टिलोपनापि संपाद्य चतुः शराव पितत्पात्रे चतुः क २७
चाग्रहान्समदशशरावउदनो निष्पन्नो भवति। अतिदेशिकी संख्या चानुग्रहीता भवति। मुष्टिलोपस्त्वावन्नयनं:
तत्रवाचस्पतिप्रेषाघाऽस्याद्दकदानां ते विशेषः प्रणीताः संस्थेन। पात्रासादने। श्रपाग्निहोत्रहवणी। कपरंक

पात्राणि निर्वपामीति· सप्त सप्त निर्वा· यदि तु वा वेन सप्त दश वा: पशुस्तादा वेतु: सप्त तिसृ नसप्त निर्वा। उलूखलमुस
लेशम्या। दृषदुपल पात्र्य: पात्रीशुके पुसेति। अनश्वे तत्रे रागखोपवेवष उपसर्जनी पात्रं पुरोडाशपात्र्यौ वाक्य
शेसप्त· अन्यथा षट्· पे श्विन्नावा· श्रृतावदानमोषधं यवा:। नीवाराश्च श्यामाकाश्च तत्र एव। पूर्णपात्रं कर्मा प
वर्गा वस्तु एव। उपकल्पनीयानि· महती वरुपात्री। करंभार्थं लौकिकं दधि। अपाग्निहोत्र हवण्यादानादि पात्री। वि
भज्य पात्रं कृत्वा· नाना बीजत्वात् पृथगवेक्षणं। युगपत्पड्क्ति निरासः। पृथगभिमर्शनं वा पड्क्त्यभावे। निर्वप
णे:। पृथग्घवि: शालंभनं। अग्नये जुष्टं गृह्णामि। तथेन्द्राग्निभ्यां जुष्टं। इन्द्राय जुष्टं ३। सरस्वत्यै जुष्टं ४। मरुद्भ्य: जोषे
भ्यो जुष्टं ५ प्रजापतये जुष्टं ६ पत्नीवाते जुष्टं ७। तत: सवनीयानां इन्द्राय जुष्टमिति पुरोडाशार्थं ८। इन्द्राय हरिवते
जुष्टमिति पात्रेण वर्धयनी वाराणां ग्रहणं।९। पृथक्करोषाभिमर्शनं। स्वादनीं कृत्वा। छिन्नपवित्राभ्यां प्रणीतान:
प्रोक्षणी: संस्कृत्य ब्रह्मानुज्ञया पृथग्घवि: प्रोक्षणं। अग्नये त्वा जुष्टं प्रोक्षामीति।१। ततइन्द्राग्निभ्यां त्वा २ इन्द्राय
त्वा ३ सरस्वत्यै त्वा ४ मरुद्भ्य: उषेजेभ्यस्त्वा ५ प्रजापतये त्वा ६। पत्नीवाते त्वा ७ तत: सवनीयानां इन्द्राय त्वा ८ इन्द्राय

इदिवेत्वा ऽइन्द्राय प्रबण्वेत्वा।१० बृहस्पतये त्वेति।।११।। ततः कृष्णाजिनोलूखलमुसलशूर्पोपवेषकर्परकपाल
निश्रोत्प उपसर्जन्यादीनां प्रोक्षणं। प्रोक्षणी निःशेषणं।। ततः कृष्णाजिनादानादिफलीकरणान्तेवघातः। तत्रैह
विरावापसु सकृद्योजनं विक्षूपनं विवेकीकरणं निमंत्रवंति पृथक्। तुषनिरसनादितं त्रेण त्रीषं। अं
नेवाग्निसर्गः। एकैकस्य विवेकीकरणान्ते पात्र्यामोप्यन्तचेत्वाभिमर्शनफलीकरणात्पूर्वं निर्दिष्टोधानाकर
मार्थानां। अन्येषां तु फलीकरणान्ते। फलीकरणं तु पृथक्। कपालानां तु प्रातःसवनिके कल्पेषु रक्षणं। अथक
पालोपधानं। आग्नेयोष्टाकपालः।१ऐन्द्राग्नो द्वादशकपालो दर्शे दृष्टत्वात्।२।एकादशकपालः सवनीयेषु
दृष्टत्वात्।३सारस्वतोष्टाकपालः।४। मरुद्भ्यः उज्जेषेभ्यः सप्तकपालो द्वादशकपालो वा। चातुर्मास्येष्वेकाद
शिण्यां च तथा तथा दर्शनात्।५प्राजापत्यो द्वादशकपालश्च्यवने दृष्टत्वात्।६वैश्वदेवोष्टाकपालः पक्षे।७सव
नीयएवं एकादशकपालः।८ कर्परोपधानं। प्रथमकपालं चरदधस्तात् दक्षिणो वक्रोपरिष्टात्पार्श्वयोरंगारः। वरु
स्थानकल्पनं। अंगारैः कपालाभ्यूहनं

१८

पत्रे ०१८ नं. ४४०३